# Samkhyatattvapradipika

# સાઙ્ખ્યતત્ત્વપ્રદીપિકા

## Document Information

Text title : sAMkhyArthatattvapradIpikA

File name : sAMkhyArthatattvapradIpikA.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સાઙ્ખ્યતત્ત્વપ્રદીપિકા

ૐ નમઃ પરમાત્મને ।
દુર્નિવારમનસ્તાપનિવારણપટીયસીમ્ ।
જગદાનન્દસન્દોહજનનીમહમાશ્રયે ॥ ૧॥

ભટ્ટકેશવસમ્ભૂતસદાનન્દાત્મજઃ સુધીઃ ।
યજુર્વિત્ કેશવઃ પ્રાહ કિઞ્ચિત્ સાંખ્યે યથામતિ ॥ ૨॥

ઇહ દ્વિવિધં તત્ત્વં પ્રકૃતિઃ પુરુષશ્ચેતિ । પ્રકૃતિરેવ પ્રધાનમિત્યભિધીયતે સત્ત્વાદિત્રિગુણા નિત્યેતિ પ્રકૃતિસ્વરૂપલક્ષણમ્ । વિકારરહિતત્ત્વાચ્ચ નિત્યૈવેયમ્ । પુરુષે અતિવ્યાપ્તિવારણાય સત્ત્વાદિત્રિગુણેત્યુક્તમ્ । સત્ત્વાદયસ્ત્રયો ગુણા યસ્યા ઇતિ વિગ્રહઃ । મહદાદિતત્ત્વાનામપિ ત્રિગુણાત્મકત્વાત્ તત્રાતિપ્રસઙ્ગવારણાય નિત્યેતિ । તટસ્થલક્ષણં તુ જગદુપાદાનકારણં પ્રકૃતિરિતિ । તથાહિ વિમતં સુખદુઃખમોહસામાન્યોપાદાનકં નિયમેન તદન્વિતસ્વભાવત્વાત્ યન્નિયમેન યદન્વિતસ્વભાવં તત્ તત્સામાન્યોપાદાનકં યથા મૃત્સામાન્યાન્વિતસ્વભાવં ઘટશરાવાદિ તથાહિ કાચન તરુણી કસ્યચિત્ કાન્તસ્ય સુખમુત્પાદયતિ કસ્યચિન્મોહં કસ્યચિદ્દ્વેષમિતિ તત્કસ્ય હેતોસ્તં તં પ્રતિ સુખદુઃકમોહાત્મકસત્ત્વરજસ્તમસામાવિર્ભાવાત્ । સા ચ ચતુર્વિંશતિધા પ્રકૃતેઃ પ્રથમો મહાનિતિ વિકારઃ પરિણામ ઇતિ યાવત્ મહત્તત્ત્વમેવ બુદ્ધિતત્ત્વમિત્યભિધીયતે અહમિત્યહંકારાખ્યો મહત્તત્ત્વસ્ય પ્રથમો વિકારઃ તદનન્તરં પઞ્ચતન્માત્રાઃ શબ્દસ્પર્શરૂપરસગન્ધાખ્યા ભવતિ અથાકાશાદિભૂતપઞ્ચકં અથૈકાદશાક્ષાણિ શ્રોત્રસ્પર્શનચક્ષૂરસનઘ્રાણવાગ્ગુદલિઙ્ગકરચરણાન્તઃકરણાન્યેકાદશેન્દ્રિયાણિ ભવન્તિ । તત્ર મહત્તત્ત્વમહંકારતત્ત્વં શબ્દાદ્યાઃ પઞ્ચતન્માત્રા ઇત્યેતત્ તત્ત્વસપ્તકં પ્રકૃતિવિકૃતિભાવાપન્નં પૂર્વં પૂર્વં પ્રતિ કાર્યત્વમુત્તરોત્તરં પ્રતિ કારણત્વમિત્યર્થઃ । તથાહિ મહત્તત્ત્વં

મૂલપ્રકૃતેઃ કાર્યં કારણં ચાહંકારતત્ત્વસ્ય અહંકારતત્ત્વં તથા
મહત્તત્ત્વસ્ય કાર્યં કારણં ચ શબ્દતત્ત્વાખ્યાદિતન્માત્રં પ્રતિ
તથાહિ તદપિ પૂર્વં પ્રતિ કાર્યમુત્તરં પ્રતિ કારણં ચેતિ બોધ્યમ્ ।
આકાશાદિભૂતપઞ્ચકમેકાદશેન્દ્રિયાણીત્યેતે પુનઃ ષોડશભાવાશ્ચ
પ્રકૃતિજન્યા એવ ન તુ કસ્યચિત્ પ્રકૃતિઃ તત્ત્વાન્તરોપાદાનરૂપત્વાભાવાત્ ।
સેયં પ્રકૃતિરચેતના પરિણામિત્વાત્ ।
નનુ વિષયાણાં ઘટાદીનાં ચેતનસમ્બન્ધઃ સાક્ષાદેવાસ્તુ કિં
મહદાદિપ્રણાલિકયેતિ ચેત્ । તત્ કિં ચિતિરેવ વિષયબન્ધનસ્વભાવા
તથા સતિ ચૈત્યન્યનિત્યતયા મોક્ષઃ કદાપિ ન સ્યાત્ । અથ ચૈતન્યં
પ્રકૃતૌ પ્રતિબિમ્બિતં પ્રકૃતિવિષયયોસ્તુ સાક્ષાત્ સમ્બન્ધઃ સ્યાત્ કિં
મહદાદિનેતિ ચેત્ તથાહિ પુરુષવન્નિત્યતયા પુનરનિર્મોક્ષાપત્તિરેવ ।
અથ ચિતિર્વિષયસમ્બદ્ધસ્વભાવા માસ્તુ વિષયા એવ ચિતિસમ્બદ્ધસ્વભાવાઃ
સન્તુ તથા ચ વિષયતિરોભાવે મોક્ષઃ સ્યાદિતિ ચેત્ તર્હીદં દૃષ્ટમિતિ
ન સ્યાત્ સર્વથા ચિતિસમ્બન્ધસ્વાભાવ્યેનાવ્યવધાનાત્ । અથ વિષયા
ઇન્દ્રિયદ્વારા ચિતિસમ્બદ્ધાત્માનઃ સન્તુ દૃષ્ટાદૃષ્ટવ્યવહારાદિ
સન્નિકર્ષવિપ્રકર્ષાભ્યામુપપત્સ્યત ઇતિ ચેન્ન વ્યાસઙ્ગાનુપપત્તેઃ
ઇન્દ્રિયસમ્બદ્ધે વિષયે જ્ઞાનોત્પત્તેરાવશ્યકત્વાત્ । અથ વ્યાસઙ્ગાનુપપત્ત્યા
મનઃ કલ્પ્યતાં કિમહંકારેણ મૈવં એવં ચ સતિ સ્વસ્મિન્ વ્યાઘ્રોહં
વરાહોહમિતિ નારોપયેત્ કિંત્વિન્દ્રિયં મનોદ્વારા ચિતિસમ્બદ્ધં સ્વકીયં
નરત્વમેવ ગૃહ્ણીયાત્ । અથૈવમહંકારોસ્તુ સ્વપ્નદશાયામારોપાર્થં
બુદ્ધિતત્ત્વે ન માનમસ્તિ મૈવં સુષુપ્ત્યવસ્થાયાં મનોવદહંકારોપિ
નિવૃત્તવ્યાપાર એવ તથા ચ શ્વાસપ્રયોજકજીવનયોનિયત્નસ્ય વ્યાપારઃ
સ્યાદિતિ તદનુરોધેન બુદ્ધિતત્ત્વસ્યાપ્યાવશ્યકત્વાત્ તસ્માદ્બુદ્ધિતત્ત્વં
પરિગમેન(?) સમ્બદ્ધો વિષયો ગજતુરગમહિષાદિઃ પુરુષેણ ચૈતન્યેન
સમ્બધ્યતે તત આસંસારબુદ્ધિતત્ત્વનાશાદેવ ચ મોક્ષ ઇતિ નાનિર્મોક્ષઃ ।
અકારણમકાર્યં ચ કૂટસ્થચૈતન્યરૂપઃ પુરુષઃ અત્રાયં પુરુષઃ સ્વયં
જ્યોતિરિતિ શ્રુત્યા તાવત્ સ્વપ્રકાશમાત્મનોઽભિધીયતે સ્વપ્રકાશં ચ
વિજ્ઞાનમેવ તેનાત્મનઃ સ્વપ્રકાશત્વમભિદધતીયં શ્રુતિર્વિજ્ઞાનાત્મકતાં
પુરુષસ્યાવેદયતિ । ન ચ ક્ષણિકસ્ય જ્ઞાનસ્ય નિત્યપુરુષાત્મકત્વં
સમ્ભવતીતિ જ્ઞાનસ્ય ક્ષણભઙ્ગુરત્વાસિદ્ધેઃ વિનાશવ્યવહારસ્ય
તવ ઘટાકાશદિવિનાશવ્યવહારવદૌપાધિકત્વેનાપ્યુપપત્તેઃ
પુરુષાતિરિક્તચૈતન્યસ્વીકર્તુસ્તવાપિ મતે જ્ઞાનસ્ય ક્ષણિકત્વે

માનાભાવઃ અન્યથા કાલાન્તરેઽનુભૂતસ્મરણાનુપપત્તિઃ । ન ચ સંસ્કારો દ્વારં તત્કલ્પનાપેક્ષયા જ્ઞાનસ્ય સ્થૈર્યકલ્પનાયાં લાઘવાત્ નિત્યત્વાચ્ચાસૌ ન કસ્યચિદ્વિકારઃ ન વા કારણં સ્વપ્રકાશત્વાત્ યદિ હિ સ્વપ્રકાશસ્યાપ્યસ્ય પ્રકૃતિત્વમાશ્રીયતે તર્હ્યેતદ્વિકૃતિત્વેનાભિમતસ્યાપિ સ્વપ્રકાશત્વમસ્ય વા જડત્વમાપદ્યેત સમાનયોરેવ પ્રકૃતિવિકૃતિભાવોપલમ્ભાત્ ભેદાગ્રહાચ્ચ નિષ્ક્રિયેપિ પુરુષે કર્તૃત્વાભિમાનઃ એવં સુખદુઃખાદિવ્યવહારોપિ તથાહિ પરિશુદ્ધચૈતન્યવિગ્રહઃ પ્રકૃતિવિકૃતિભાવાનપેતતટસ્થઃ પુષ્કરપલાશવન્નિર્લેપોઽપ્યન્તઃકરણાકારપરિણતપ્રકૃતિતાદાત્મ્યમવિવેકલક્ષણમવિદ્યયા પ્રતિપદ્યતે તતશ્ચેતરેતરાધ્યાસાદન્તઃકરણાવૃત્તીનાં દુઃખાદીનાં પુરુષે પુરુષધર્માણાં ચિચ્ચૈતન્યાદીનામન્તઃકરણેઽધ્યાસાદહં દુઃખીત્યાદિવ્યવહારો ભવતીતિ । અવિદ્યાનામાતાત્ત્વિકી ખ્યાતિઃ સા ચ તમોગુણોદ્રેકાદાવિર્ભવન્તી વિવિક્તયોસ્તાદાત્મ્યમવભાસયતિ । તતશ્ચોત્તરેષામસ્મિતારાગદ્વેષાભિનિવેશાનાં ક્લેશશબ્દાભિધેયાનાં હેતુરવિદ્યેતિ ગીયતે । તત્સિદ્ધં નિર્લેપ એવાયમિતિ । અસઙ્ગો હ્યયમિતિ શ્રુતેરુપપદ્યતે ચ । ન ચ કોપ્યસ્ય વ્યાપાર ઇતિ આલોચનં તાવદિન્દ્રિયવ્યાપારઃ વિકલ્પસ્તુ મનસઃ અભિમાનોહંકારસ્ય કૃત્યધ્યવસાયો બુદ્ધેઃ । અથ કૃત્યધ્યવસાયઃ કૃતિમત્તયા જ્ઞાનં તત્કથમચેતનાયા બુદ્ધેરિતિ બુદ્ધિરંશત્રયવતી પુરુષોપરાગો વિષયોપરાગો વ્યાપારાવેશશ્ચેતિ । ભવતિ હિ મમેદં કર્તવ્યમિતિ તત્ર મમેત્યંશશ્ચેતનસ્ય દર્પણનિર્મલાયા બુદ્ધેઃ પ્રતિબિમ્બ ઉપધાનં તચ્ચાતાત્ત્વિકમેવ ચૈતન્યેન બુદ્ધેર્વાસ્તવસમ્બન્ધાભાવાત્ યથા દર્પણં મુખસમ્બન્ધમન્તરેણાપિ પુરુષભ્રમસ્તદ્વદિહાપિ । ઇદમિતિ વિષયોપધાનં તચ્ચ વાસ્તવમેક ઇન્દ્રિયપ્રણાલિકયા બુદ્ધૌ જ્ઞાનરૂપવિષયસમ્બન્ધાત્ દર્પણસ્યેવ નિઃશ્વાસાભિહતસ્ય મલિનિમા પારમાર્થિકઃ પુરુષોપરાગઃ વિષયોપરાગમાહિમ્ના ચ કૃતિમત્તયાધ્યવસાયઃ અયમેવ વ્યાપારાવેશઃ । અથ જ્ઞાનમેવ ચૈતન્યં કથમનયોર્ભેદ ઇતિ ઉચ્યતે કૃત્યધ્યવસાયલક્ષણવ્યાપારવિશિષ્ટા બુદ્ધિરિન્દ્રિયપ્રણાલિકયા બુદ્ધેર્વિષયસ્ય ઘટાદેઃ સમ્બન્ધો વૃત્તિવિશેષસ્તદેવ જ્ઞાનં વિષયોપરાગેણ સહ યઃ પુરુષોપરાગસ્યાતાત્ત્વિકઃ સમ્બન્ધઃ સ ઉપલબ્ધિઃ યથા દર્પણનિષ્ઠા મલિનિમા દર્પણપ્રતિબિમ્બિતમુખે દૃશ્યતે તથેતિ યાવત્ । તથા ઘટમહં જાનામીત્યનુવ્યવસાયાખ્યોપલબ્ધિરિતિ વિભાવનીયમ્ ।

તદેવ જ્ઞાનં સુખદુઃખેચ્છાદ્વેષપ્રયત્નધર્માધર્મરૂપા અષ્ટૌ ભાવા બુદ્ધેરેવ અહં જાને સુખીત્યાદિસામાનાધિકરણ્યપ્રતીતેઃ । નનુ યત્રૈતે ધર્માઃ સ એવ ચેતનઃ કિં ન સ્યાદિતિ ચેન્ન અનિત્યધર્મરૂપતયા પરિણામિત્વાત્ ધર્મધર્મિણોરભેદાત્ । યે પુનસ્તયોર્ભેદં પ્રતિપન્નાસ્તાર્કિકપ્રભૃતયસ્તે તાવન્નીલો ઘટા ઇત્યાદ્યભેદાવગાહિપ્રત્યયમપશ્યન્ત ઉપેક્ષણીયાઃ । નનુ પ્રધાનસ્યાચૈતન્યસ્ય કથં જગત્કર્તૃત્વં યત્ ખલુ નામ્ના રૂપેણ ચ વ્યાક્રિયતે તચ્ચેતનકર્તૃકં દૃષ્ટં યથા ઘટાદિ । વિવાદાધ્યાસિતં ચ જગન્નામરૂપેણ વ્યાકૃતં તસ્માચ્ચેતનકર્તૃકમિતિ સમ્ભાવ્યતે ચેતનો હિ  બુદ્ધાવાલિખ્ય નામરૂપે ઘટા ઇતિ નામ્ના રૂપેણ ચ કમ્બુગ્રીવાદિના બાહ્યં ઘટં નિષ્પાદયતિ । અત એવ ઘટસ્ય નિવર્ત્યસ્યાપ્યન્તઃસંકલ્પાત્મના સિદ્ધસ્ય કર્મકારકભાવો ઘટં કરોતીતિ ।

અત્ર વદામઃ ચૈતન્યસ્ય જગદુપાદાનત્વે જગતો જડત્વાનુપપત્તિઃ યત્ કાર્યં તચ્ચેતનકર્તૃકમિતિ વ્યાપ્ત્યા શરીરી કર્તા સ્યાત્ કિં ચ તથાપિ જ્ઞાનસ્ય ચૈતન્યવિશિષ્ટસ્ય ક્ષિત્યાદિજનકત્વે માનાભાવઃ કુલાલાદિજ્ઞાનેચ્છયોઃ કૃતિજનકત્વેનૈવાન્યથાસિદ્ધત્વાત્ ઈશ્વરકૃતેશ્ચ જન્યત્વાત્ । અથ યઃ કૃતિમાન્ સ જ્ઞાનવાનિતિ વ્યાપ્ત્યા તત્સિદ્ધિઃ એવં હિ યો જ્ઞાનવાન્ સ સુખીત્યાદિવ્યાપ્ત્યા સુખમપીશ્વરે સ્યાત્ અપ્રયોજકત્વં ચેત્ તુલ્યં તવાપિ । કર્મૈવ જગત્કારણમિત્યપિ યે પ્રતિપન્નાસ્તે તાવન્નત્યન્તં પારિહર્તવ્યાઃ ધર્માધર્માત્મકાર્થાનર્થલક્ષણચોદનાલક્ષણસ્ય પ્રકૃત્યભેદાત્ બુદ્ધ્યાકારપરિણતાયા એવ પ્રકૃતેરષ્ટૌ ભાવા ઇત્યભ્યુપગમાત્ ।

અથેદાનીં પ્રમાણં વિવેચયામઃ । તત્ તાવત્ ત્રિવિધમ્ પ્રત્યક્ષાનુગમાનાગમભેદાત્ । પ્રત્યક્ષપ્રમાકરણં પ્રત્યક્ષમ્ । લિઙ્ગમનુમાનમ્ । અથાતીતાનાગતયોઃ કથં લિઙ્ગભાવઃ જાત્યા ધર્માધર્માત્મના તત્સત્ત્વાત્ । આપ્તવચનં શબ્દઃ યથાસ્મિન્નરપતિનિલયે ગજરથતુરગાઃ સન્તીતિ । પાન્થસકલાધ્યાયવચન(?)મનુમાને ચરિતાર્થત્વાન્નોપમાનમર્હતિ ।

અર્થાપત્તિરભાવશ્ચ સમ્ભવશ્ચેષ્ટિતં તથા ।
નૈતિહ્યમાગમાતદ્ધિ વ્યક્તમન્યત્ર વિસ્તરાત્ ॥

સ ચાયં પુરુષઃ પ્રતિશરીરં ભિન્નઃ । તથાહિ વિમતાનિ શરીરાણિ સ્વસંખ્યાસંખ્યેયાત્મવન્તિ શરીરત્વાત્ સમ્પ્રતિપન્નવત્ કિં ચૈવં યથૈકસ્મિન્નેવ જીવતિ દેવદત્તે શરીરે જાતે વા ચેષ્ટાવતિ વા મૃતે વા ભાવોઽપિ જાતચેષ્ટાવાન્ મૃતઃ કિલેતિ લોકો વ્યવહરતિ તથા શરીરાન્તરેપિ

તથૈવ વ્યવહારાત્ તસ્માત્ પુરુષભેદોભ્યુપેયઃ ।
એકમેવાદ્વિતીયમિત્યાદિશ્રુતેશ્ચ કથઞ્ચિદુપચરિતાર્થત્વેન તથા
આત્મનો હિ વિભુનિયત્વાદભિન્નદેશકાલા ઇત્યેકત્વેનોચ્યતે અજો હ્યેકો
જુષમાણોઽનુશેતે જહાત્યેનાં ભુક્તભોગામજોઽન્ય ઇત્યાદિશ્રુતેશ્ચ
પુરુષભેદમવગચ્છામઃ । કિં પુનરસ્ય પ્રયોજનં નિઃશ્રેયસં કિં
તત્ અખિલાનર્થમૂલભૂતાયા અવિદ્યાયાઃ સત્ત્વાતિશયવિશેષાવિર્ભૂતવિદ્યયા
વિનાશે સતિ તત્પુરુષસ્ય સહજચૈતન્યાત્મનાવસ્થાનં તન્મોક્ષાપરપર્યાયં
નિઃશ્રેયસં પ્રકૃતિપુરુષવિવેકજ્ઞાનં ચ તદ્ધેતુઃ ।
નનુ પ્રકૃતેર્નિત્યત્વાત્ પુનરપિ
તમોદ્રેકસમ્ભવાદવિદ્યાવિર્ભાવસમ્ભવે મુક્તિપ્રચ્યુતિઃ
સ્યાદિતિ । નૈતત્ દૃઢતમચિત્તવૃત્તિનિરોધલક્ષણયોગબલાત્
પુનરુદ્રેકાનુપપત્તેઃ । યદાહુઃ સ તુ દીર્ઘકાલનૈરન્તર્યસત્કારસેવિતો
દૃઢભૂમિર્વ્યુત્થાનસંસ્કારેણ ન બાધ્યત ઇતિ । અથ નિર્લેપસ્યાસ્ય
મહાપુરુષસ્ય સમ્બન્ધ એવ ન કુતોઽપવર્ગ ઇતિ સત્યમાહ કિં તુ
પ્રકૃતેરેવ બન્ધમોક્ષૌ પુંસ્યુપચર્યેતે તદાહુઃ ।
રૂપૈઃ સપ્તભિરેવં બધ્નાત્યાત્માનમાત્મના પ્રકૃતિઃ ।
સૈવ ચ પુરુષસ્યાર્થં વિમોચયત્યેકરૂપેણ ॥ ઇતિ ।
અયમર્થઃ ધર્માધર્મવૈરાગ્યાવૈરાગ્યૈશ્વર્યાનૈશ્વર્યજ્ઞાનાજ્ઞાનાન્યષ્ટૌ
પ્રકૃતિરૂપાણિ તત્ર જ્ઞાનવ્યતિરિક્તૈઃ ધર્માધર્માદ્યૈઃ સપ્તભી રૂપૈઃ
પ્રકૃતિરાત્મનૈવાત્માનં બધ્નાતિ એકરૂપેણ જ્ઞાનાખ્યેન ચ વિમોચયતીતિ ।
યદાહુઃ ।
ધર્મેણ ગમનમૂર્ધ્વં ગમનમધસ્તાદ્ભવત્યધર્મેણ ।
જ્ઞાનેન ચાપવર્ગો વિપર્યયાદિષ્યતે બન્ધમ્ ॥ ઇતિ ।
શિષ્ટં સકલમકલઙ્કં ચાભ્યુદયસિદ્ધાન્તસિદ્ધમિત્યુપેક્ષિતમિતિ ।
દર્શિતાનર્થમૂલાય સર્વતત્ત્વાર્થદર્શિને ।
કરુણાપૂર્ણચિત્તાય કપિલાય નમો નમઃ ॥

ઇતિ સાંખ્યાર્થતત્ત્વપ્રદીપિકા સમાપ્તા ॥

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*Samkhyatattvapradipika*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*